श्री दामोदर स्तोत्रं

श्री दामोदर स्तोत्रं

सिंधुदेशोद्भवो विप्रो नाम्ना सत्यव्रतः सुधीः |
विरक्त इंद्रियार्थेभ्यस्त्यक्त्वा पुत्रगृहादिकं || 1 ||

वृंदावने स्थितः कृष्णमाराध दिवानिशं |
निःस्वः सत्यव्रतो विप्रो निर्जनेऽव्यग्रमानसः || 2 ||

कार्तिके पूजयामास प्रीत्या दामोदरं नृप |
तृतीयेऽह्नि सकृद्भुंक्ते पत्रं मूलं फलं तथा || 3 ||

एवं भावसमायुक्तो भक्त्या तद्गतमानसः |
पूजयित्वा हरिं स्तौति प्रीत्या दामोदराभिधं || 4 ||

सत्यव्रत उवाच |
नमामीश्वरं सच्चिदानंदरूपं
लसत्कुंडलं गोकुले भ्राजमानं |
यशोदाभियोलूखले धावमानं
परामृष्टमत्यंततो दूतगोप्या || 5 ||

रुदंतं मुहुर्नेत्रयुग्मं मृजंतं
करांभोजयुग्मेन सातंकनेत्रं |
मुहुः श्वासकं पत्रिरेखांककंठं
स्थितं नौमि दामोदरं भक्तवंद्यं || 6 ||

वरं देव देहीश मोक्षावधिं वा
न चान्यं वृणेऽहं वरेशादपीह |
इदं ते वपुर्नाथ गोपालबालं
सदा मे मनस्याविरास्तां किमन्यैः || 7 ||

इदं ते मुखांभोजमत्यंतनीलै-
-र्वृतं कुंतलैः स्निग्धवक्त्रैश्च गोप्या |
मुहुश्चुंबितं बिंबरक्ताधरं मे
मनस्याविरास्तामलं लक्षलाभैः || 8 ||

नमो देव दामोदरानंत विष्णो
प्रसीद प्रभो दुःखजालाब्धिमग्नं |
कृपादृष्टिवृष्ट्याऽतिदीनं च रक्ष
गृहाणेश मामज्ञमेवाक्षिदृश्यं || 9 ||

कुबेरात्मजौ वृक्षमूर्ती च यद्व-
-त्त्वया मोचितौ भक्तिभाजौ कृतौ च |
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ
न मोक्षे ग्रहो मेऽस्ति दामोदरेह || 10 ||

नमस्ते सुधाम्ने स्फुरद्दीप्तधाम्ने
तथोरःस्थविश्वस्य धाम्ने नमस्ते |
नमो राधिकायै त्वदीयप्रियायै
नमोऽनंतलीलाय देवाय तुभ्यं || 11 ||

नारद उवाच |
सत्यव्रतद्विजस्तोत्रं श्रुत्वा दामोदरो हरिः |
विद्युल्लीलाचमत्कारो हृदये शनकैरभूत् || 12 ||

इति श्रीमहापुराणे सत्यव्रतकृत श्री दामोदर स्तोत्रं |